कैरातं, क्ली, (किराते पर्य्यन्तभूमौ भवं इत्यण् ।) भूनिम्बः । इति शब्दचन्द्रिका ॥ शम्बरचन्दनम् । इति राजनिर्घण्टः ॥

कैरातः, पुं, (किराते पर्य्यन्तभूमौ भवः । इत्यण् ।) भूनिम्बः । इति राजनिर्घण्टः ॥ (किरात इव शूरः इवार्थे अण् ।) बलवान् पुरुषः । तत्पर्य्यायः । दोर्य्यः २ चाणूरः ३ । इति हारावली ॥ (किरातस्य वेश इव वेशो यस्य । अर्श आद्यच् ततः स्वार्थे अण् । किरातवेशधारिणि, त्रि । यथा, महाभारते १ । २ । ६० ।
"ईश्वरार्ज्जुनयोर्युद्धं पर्व्वकैरातसंज्ञितम्" ॥
तथा, मनसाध्याने । "कैरातीं वरदाभयोद्यतकरां देवीं त्रिनेत्रां भजे" ॥)

कैरालं, क्ली, (किरं पर्य्यन्तभूमिं अलति पर्य्याप्नोतीति । अल् + "कर्म्मण्यण्" इत्यण् । ततः स्वार्थे अण् ।) विड़ङ्गम् इति वैद्यकम् ॥

कैराली, स्त्री, (कैराल + स्त्रियां गौरादित्वात् ङीष् ।) विड़ङ्गा । इति राजनिर्घण्टः ॥

कैलासः, पुं, (के जले लासो लसनं दीप्तिरस्य । "हलदन्तात् सप्तम्याः" । ६ । ३ । ९ । इति अलुक् केलसः स्फटिकमणिः तद्वत् शुभ्रः इत्यण् । यद्वा, केलीनां समूहः । कैलं । "तस्य समूहः" । ४ । २ । ३७ । इत्यण् वृद्धिश्च । कैलेनास्यतेऽत्र । आस् + अधिकरणे घञ् ।) स्वनामख्यातपर्व्वतः । इत्यमरः । १ । २ । ७४ ॥ स च शिवकुवेरयोः स्थानम् । तस्य परिमाणं यथा । "जठरदेवकूटौ मेरोः पूर्व्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रं पृथुतुङ्गौ भवतः । एवमपरेण पवनपारिपात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतौ" । इति श्रीभागवतम् ॥ (अयं हि वृहत्संहितायां कूर्म्मविभागे उत्तरस्यामुक्तः ॥)

कैलासनिकेतनः, पुं, (कैलासः निकेतनं यस्य ।) शिवः । इति कविकल्पलता ॥

कैलासौकाः, [स्] पुं, (कैलासः ओकः स्थानं आलयोऽस्य ।) कुवेरः । इति हेमचन्द्रः ॥

कैवर्त्तः, पुं, (के जले वर्त्तते । वृत् + अच् अलुक् समासः । ततः स्वार्थे अण् ।) स्वनामख्यातवर्णसङ्करजातिः । स तु वैश्यागर्भे क्षत्रियस्यौरसजातः । इति ब्रह्मवैवर्त्तपुराणम् ॥ तत्पर्य्यायः । दासः २ धीवरः ३ । इत्यमरः । १।१०।१५ ॥ दाशेरकः ४ जालिकः ५ । इति जटाधरः ॥ (यथा, मनुः । १० । ३४ ।
"निषादो मार्गवं सूते दाशं नौकर्म्मजीविनम् ।
कैवर्त्तमिति यं प्राहुरार्य्यावर्त्तनिवासिनः" ॥
अस्य टीकायां कुल्लूकभट्टेन यदुक्तं तद्यथा ।
"ब्राह्मणेन शूद्रायां जातो निषादः प्रागुक्तः प्रकृतायामायोगव्यां मार्गवं दाशापरनामानं नौव्यवहारजीविनं जनयति । यमार्य्यावर्त्तदेशवासिनः कैवर्त्तशब्देन कीर्त्तयन्ति" ॥)

कैवर्त्तमुस्तं, क्ली, (के जले जलयुक्तभूमौ वर्त्तते जायते इति केवर्त्तं ततः स्वार्थे अण् । कैवर्त्तं च तत् मुस्तञ्चेति कर्म्मधारयः ।) कैवर्त्तमुस्तकम् । इति शब्दरत्नावली ॥

कैवर्त्तमुस्तकं, क्ली, (कैवर्त्तमुस्त + स्वार्थे कन् । यद्वा कैवर्त्तस्य प्रियं मुस्तकम् ।) कैवर्त्तीमुस्तकम् । इत्यमरटीकायां भरतः ॥

कैवर्त्तिका, स्त्री, (कैवर्त्ती जलस्था इव । इवार्थे कन् ततो ह्रस्वः ।) मालवे प्रसिद्धो लताविशेषः । तत्पर्य्यायः । सुरङ्गा २ लता ३ वल्ली ४ दशाङ्गुला ५ रङ्गिणी ६ वस्त्ररङ्गा ७ सुभगा ८ । अस्या गुणाः । लघुत्वम् । हृद्यत्वम् । कषायत्वम् । कफकासश्वासमन्दाग्निदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

कैवर्त्तिमुस्तकं, क्ली, (कैवर्त्त्याः कैवर्त्तपत्न्याः प्रियं मुस्तकम् । संज्ञायां "ङ्यापोः" । ६ । ३ । ६३ । इति वा ह्रस्वः ।) कैवर्त्तीमुस्तकम् । इत्यमरटीका ॥

कैवर्त्ती, स्त्री, (के जले वर्त्तते इति । वृत् + अच् । केवर्त्ता जलस्था सा एव इति स्वार्थे अण् ततो ङीप् ।) परिपेलम् । इति वैद्यकम् ॥ कैवर्त्तपत्नी च ॥

कैवर्त्तीमुस्तकं, क्ली, (कैवर्त्त्या कैवर्त्तपत्न्याः प्रियं मुस्तकम् । संज्ञायां "ङ्यापोः" । ६ । ३ । ६३ । इति विकल्पे ह्रस्वविधेरत्र ह्रस्वाभावः ।) मुस्ताप्रभेदः । इति भरतः ॥ केश्योटमुता इति भाषा । केशुर इति नीचोक्तिः । केशुरिया मुथा । इति सारसुन्दरी ॥ तत्पर्य्यायः । कुटन्नटम् २ दशपुरम् ३ वानेयम् ४ परिपेलवम् ५ प्लवम् ६ गोपुरम् ७ गोनर्द्दम् ८ इत्यमरः । २ । ४ । १३१ ॥ दाशपुरम् ९ दाशपूरम् १० दशपुरम् ११ दशपूरम् १२ परिपेलम् १३ पारिपेलम् १४ कैवर्त्तमुस्तकम् १५ कैवर्त्तिमुस्तकम् १६ । इति तट्टीका ॥ वनसम्भवम् १७ । इति रत्नकोषः ॥ धान्यम् १८ शीतपुष्पम् १९ जीर्णबुध्नकम् २० वन्यम् २१ सितपुष्पम् २२ । इति जटाधरः ॥ अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवायुव्रणदाहास्मशूलरक्तदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ हिमत्वम् । तिक्तत्वम् । कषायत्वम् । कान्तिदत्वम् । पित्तविसर्पकुष्ठकण्डुविषनाशित्वञ्च । इदन्तु वितुन्नकनाम्नो वृक्षस्य त्वक् मुस्ताकृति ॥ इति भावप्रकाशः ॥

कैवलं, क्ली, (के शिरोऽवच्छेदे वलते संवृणोति केशादेरतिसौरभ्यकरणात् के जले वलते गुणाधिक्यात् वर्द्धते वा । वल + अच् ततः स्वार्थे अण् ।) विड़ङ्गम् । इति रत्नमाला ॥ (केवलस्य भावः इति केवलशब्दात् ब्राह्मणादित्वात् ष्यञ् ॥)

कैवल्यं, क्ली, (केवलस्य सर्व्वोपाधिवर्ज्जितस्य भावः इति । केवल + ष्यञ् ।) मुक्तिः । इत्यमरः । १।५।६ ॥ (तथा च पातञ्जले कैवल्यपादे ३ सूत्रं यथा,
"निमित्तमप्रयोजकं प्रकृतीनां
वरणभेदस्तु ततः क्षेत्रिकवत्" ॥
निमित्तं धर्म्मादि तत्प्रकृतीनामर्थान्तरपरिणामेन प्रयोजकं न हि कार्य्येण कारणं प्रवर्त्तते । वरणभेदस्तु ततः क्षेत्रिकवत् ततस्तस्मादनुष्ठीयमानाद् धर्म्मात् वरणमावरणकं अधर्म्मादि तस्यैव विरोधित्वात् भेदः क्षयः क्रियते तस्मिन् प्रतिबन्धे क्षीणे प्रकृतयः स्वयमभिमतकार्य्याय प्रभवन्ति । क्षेत्रिकवत् । यथा, क्षेत्रिकः कृषीवलः केदारात् केदारान्तरं जलं निनीषुर्ज्जलप्रतिबन्धकवरणभेदमात्रं करोति । तस्मिन् भिन्ने जलं स्वयमेव प्रसरद्रूपं परिणामं गृह्णाति न तु जलप्रसरणे तस्य कश्चित् प्रयत्नः । फलतः यावत् योगादिप्रभावेण अधर्म्माद्यावरणभेदो न भवेत् तावत् कुतस्तत्त्वज्ञानं किञ्च यावत्तत्त्वज्ञानप्रभावात् सर्व्वा वासना न क्षयं यान्ति तावत् कुत एव कैवल्याशेति ध्येयम् । तथा च तत्रैव । ११ ।
"हेतुफलाश्रयालम्बनैः संगृहीतत्वादेषामभावे तदभावः" ॥
वासनानामनन्तरानुभवो हेतुस्तस्यानुभवस्य रागादयस्तेषामविद्येति साक्षात् पारम्पर्य्येण च हेतुः । फलं शरीरादि स्मृत्यादि च । आश्रयो बुद्धिरालम्बनं यदेवानुभवस्य तदेव वासनानामतस्तैर्हेतुफलाश्रयालम्बनैरनन्तानामपि वासनानां संगृहीतत्वात्तेषां हेतूनामभावे ज्ञानयोगाभ्यां दग्धवीजकल्पत्वे विहिते निर्म्मूलत्वाच्च वासनाः प्ररोहं न यान्ति न वा कार्य्यमारभन्त इति तासामभावः ॥ अत्र भगवद्गीतायाम् । ४ । ३७ ।
"यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्ज्जुन ! ।
ज्ञानाग्निः सर्व्वकर्म्माणि भस्मसात् कुरुते तथा" ॥
अतएव सत्त्वादिषु गुणेषु कृतार्थेषु भोगापवर्गादिलक्षणेषु पुरुषार्थेषु समाप्तेषु कैवल्यमित्येव सारसिद्धान्तवाक्यम् । यथा, पातञ्जले । ३३ ।
"पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति" ।
समाप्तभोगापवर्गलक्षणपुरुषार्थानां गुणानां यः प्रतिप्रसवः प्रतिलोमस्य परिणामस्य समाप्तौ विकारानुद्भव क्षणेषु यदि वा चिच्छक्तेर्वृत्तिसारूप्यनिवृत्तौ स्वरूपमात्रेऽवस्थानं तत् कैवल्यमुच्यते । इत्थं सर्व्वेष्वेव दर्शनेष्वधिष्ठातृत्वं विहाय नान्यदात्मनोरूपमुपपद्यते । अधिष्ठातृत्वञ्च चिद्रूपत्वं तच्च जड़ात् वैलक्षण्यमेव चिद्रूपतया यदधितिष्ठति तदेव भोग्यतां नयति यच्च चेतनाधिष्ठितं तदेव सकलव्यापारयोग्यं भवति । एवञ्च सति नित्यत्वात् प्रधानस्य व्यापारनिवृत्तौ यदात्मनः कैवल्यमस्माभिरुक्तं तद्विहाय दर्शनान्तराणां नान्या गतिः तस्मादिदमेव युक्तमुक्तं वृत्तिसारूप्यपरिहारेण स्वरूपे प्रतिष्ठा चितिशक्तेः कैवल्यम् । यथा, "पुरुषस्य द्रष्टृत्वमुक्ता चित्तद्वारेण सकलव्यवहारनिष्पत्तिमुपपाद्यपुरुषसत्त्वे प्रमाणमुपदर्श्य कैवल्यनिर्णयाय दशभिः सूत्रैः क्रमेणोपयोगिनोऽर्थानभिधाय शास्त्रान्तेऽप्येतदेव कैवल्यमित्युपपाद्य कैवल्यस्वरूपं निर्णीतम्" । परं जन्मौषधिमन्त्रसमाधिजन्यासु सिद्धिषु सतीष्वपि ज्ञानभक्त्यादियोगेन येन केनचिदुपायेन भगवदनुकम्पालाभ एव कैवल्योपायः । पातञ्जलदर्शनटीकाकृत् महाराजभोजाधीश्वरोप्येतदङ्गीकृत्य कैवल्यपादस्य टीकायां मङ्गलाचरणं कृतवान् । यथा,—
"यदाज्ञयैव कैवल्यं विनोपायैः प्रजायते ।
तमेकमजमीशानं चिदानन्दमयं स्तुमः" ॥